Shodhshauryam, International Scientific Refereed Research Journal
© 2023 SHISRRJ | Volume 6 | Issue 2 | ISSN : 2581- 6306

# प्रश्नशास्त्रस्य फलकथनप्रविधिः

**प्रो.प्रभातकुमारमहापात्रः**

**ज्योतिषविभागाध्यक्षः, केन्द्रीयसंस्कृतविश्वविद्यालयः, एकलव्यपरिसरः, अगरतला, त्रिपुरा**

**Article Info**

**Publication Issue :**
March-April-2023
Volume 6, Issue 2
**Page Number :** 149-161
**Article History**
Received : 07 March 2023
Published : 15 April 2023

**शोधसारांशः** - वृक्षलतादिभिरावृते घोरान्धकारवने, श्मसाननिकटे, निम्नोच्चस्थाने, जनशून्यमन्दिरे, दुःखकष्टेन पीडितस्य जीर्णगृहे, प्रेतक्रियाद्यशुभकर्मणि स्थाने, जल-अग्नि-शुष्कवृक्षसमीपे, पञ्चेन्द्रियमनः अप्रीतिकरस्थाने, अनिष्टदे प्रदेशे च प्रश्नः न करणीयः। यदि कश्चित् प्रश्नं करोति तर्हि तस्याभीप्सितं नश्यति।

**मुख्यशब्दाः-** संयुक्तप्रश्नः, असंयुक्तप्रश्नः, अभिहतप्रश्नः, अनभिहतप्रश्नः, अभिघातिकप्रश्नः, आलिङ्गितप्रश्नः, अभिधूमितप्रश्नः।

आधुनिकविज्ञानयुगेऽप्यस्माकं भारतीयप्रश्नविज्ञानं लोके स्वकीयां चमत्कृतिं नितरां व्यञ्जयद्दरीदृश्यत इति नाविदितं विज्ञैः। यथा जन्मकुण्डलीफलादेशः सत्यं घटते तथैव प्रश्नकुण्डलीफलादेशोऽपि सत्यं घटते। प्रश्नगोचरकालाधीनं भावि शुभाशुभफलं भवति । फलनिर्देशक्रम उच्यते -

**पृच्छानिर्गममार्गमन्दिरगतिप्रश्नक्रियासम्भवम्।**

**सूत्रत्रिस्फुटजाष्टमङ्गलफलारूढोदयेन्दूद्भवम्।।**

**आयुः खेटवशाश्च जातकवशात्संचिन्त्य भावान् परान्।**

**देवानामनुकूलतादि च वेदद्बाधाभिचाराद्यपि** ।।(प्र.मा.द्वि.अ.2, श्लो.13-14)

अर्थात् प्रश्नकर्तुं पृच्छकः यदा गृहात् निर्गच्छति तस्मिन् काले, दैवज्ञगृहे प्रवेशकाले, दैवज्ञस्य कृते प्रश्नक्रियाकाले यत् शकुनं विचार्य तैः शुभाशुभशकुनैः त्रिस्फुटसूत्रैः अष्टाङ्गनिमित्तैः आरूढलग्नेन चन्द्रेण च फलविचारः करणीयः। तथा च ग्रहवशादायुः, जन्माङ्गचक्रवशात् भावानां शुभाशुभं ज्ञात्वा दैवानामनुकूलतादि मारणमोहनाद्यभिचारक्रियाभिः फलकथनं करणीयम्। तत्रादौ आयुरोगशोकादीनां शुभाशुभं दृष्ट्वा तदनन्तरं पृच्छकेन पृष्टप्रश्नस्योत्तरं वदेत्। तत्रापि कथ्यते दैवज्ञसावधानेन पश्येत् -

**दैवज्ञसावधानत्वं प्रष्टुश्च प्रश्नसौष्ठवम्।**

**इष्टद्रव्यश्रुतीक्षे च सम्यगिष्टोपलब्धये** ।।(प्र.मा.द्वि.अ.2, श्लो.15)

यदि पृछकेन अनेके प्रश्नाः पृछयन्ते तदा मुख्यप्रश्नस्य चयनमादौ करणीयम्। अतः ताजिकनीलकण्ठीग्रन्थे कथ्यते -

**ऋजुरयमनृजुर्वाऽयं प्रष्टा पूर्वं परीक्ष्य लग्नबलात्।**

**गणकेन फलं वाच्यं दैवं तच्चित्तगं स्फुरति ।।**

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

**लग्नस्थे शशिनि शनौ केन्द्रस्थे ज्ञे दिनेशरश्मिगते।**

**भौमज्ञयोः समदृशा लग्नगचन्द्रेऽनृजुः प्रष्टा ।।**

**लग्ने शुभग्रहयुते सरलः क्रुरान्विते भवेत्कुटिलः।**

**लग्नेऽस्ते सौम्यदृशा विधुगुरूदृष्ट्या च सरलोऽयम्।।**

**यदि गुरुबुधयोरेकः पश्यत्यस्ताधिपञ्च रिपुदृष्ट्या।**

**तत्कुटिलः प्रष्टा खल्वनयोरेकस्तयोः साधुः ।।**(ता.नी.प्र.त.अ.श्लो.7-10)

अर्थात् वर्त्तमानः प्रश्नकर्त्ता सरलः वा कुटिलः अस्तीति लग्नविचारवशात् प्रथमं परीक्ष्य ततः गणकेन शुभाशुभं वाच्यम्। तत्र भाग्यं भावफलं गणकमनोगतं सत् स्फुरति। तद्योगं यथा - चन्द्रे लग्नस्थे, शनौ केन्द्रस्थे सति बुधे अस्तङ्गते, रवितश्चतुर्दशांशान्तर्गते सति पृच्छकः कुटिलो भवति। अथवा कुजबुधयोः तुल्यदृष्ट्या लग्नचन्द्रे दृष्टे सति पृच्छकः कुटिलो भवति। अथवा लग्ने शुभग्रहयुते सति प्रष्टा सरलो भवति। लग्ने पापयुतदृष्टे सति कुटिलः प्रष्टा भवति। अथवा लग्ने सप्तमस्थाने च बुधदृष्ट्या एवं पूर्णचन्द्रगुरुदृष्ट्या दृष्टे सति अयं सरलः स्यात्। वा यदि गुरुबुधयोः एकतरः कश्चिद्ग्रहः रिपुदृष्ट्या केन्द्रस्थानेषु (1, 4, 7, 10) अन्यतमदृष्ट्या सप्तमेशं पश्यति चेत्तदा प्रष्टा कुटिलः स्यात्। वा गुरुबुधयोरेको ग्रहः मित्रदृष्ट्या लग्नं पश्यति चेत्तदा प्रष्टा सरलः भवेत्।

प्रष्टुः बहुषु प्रश्नेषु प्रथमं प्रश्नलग्नात् ज्ञेयम्। द्वितीयकं तु चन्द्रस्थानात् ज्ञेयम्। चतुर्थ तु गुरुराशितो विचिन्त्यम्। अथ बुधशुक्रयोः यो बली ग्रहः तद्ग्रहात् पञ्चमं प्रश्नविषयकं विचार्यम्। यः शास्त्रादेशानुसारं सम्यक् लग्नं विचार्य सकृत् एकमेव प्रश्नं ब्रूयात् तस्य ज्योतिर्विदो वाणी मिथ्या न भवेत्।

**प्रश्नशास्त्रस्य भेदाः**- केरलशास्त्रानुसारं प्रश्नस्याष्टौ भेदाः कथिताः। 1) संयुक्तप्रश्नः, 2) असंयुक्तप्रश्नः, 3) अभिहतप्रश्नः, 4) अनभिहतप्रश्नः, 5) अभिघातिकप्रश्नः, 6) आलिङ्गितप्रश्नः, 7) अभिधूमितप्रश्नः, 8) दग्धप्रश्नश्च। यथोक्तम् -

**संयुक्तः, असंयुक्तः, अभिहतः, अनभिहतः, अभिघातिकः।**

**आलिङ्गतः, अभिधूमितः, दग्धः, प्रश्न इति।।**(केरलप्रश्न.श्लो.14)

1) **संयुक्तप्रश्नस्य लक्षणम्** - यदि पृच्छकः प्रश्नकाले स्वकीयं शरीरं स्पृष्ट्वा प्रश्नं पृच्छति तदेव संयुक्तप्रश्नः कथ्यते। स च संयुक्तप्रश्नः लाभकरो भवति। यथोक्तम् -

**यदि प्रष्टा प्रश्न समये स्वकायं स्पृष्ट्वा पृच्छति।**

**तदा संयुक्तप्रश्नः स च लाभकरो भवति।।**(केरलप्रश्न.श्लो.15)

अत्र संयुक्तप्रश्ने प्रश्नकाले प्रश्नकर्ता केन हस्तेनाङ्गं स्पृष्टवानिति विषयः श्लोकेऽस्मिन् न प्रतिपादितः, परन्तु वक्ष्यमाणश्लोकेन ज्ञायते यत् - प्रश्नकत्रा दक्षिणाङ्गस्पर्शः संयुक्तप्रश्नद्योतको भवति।

2) **असंयुक्तप्रश्नस्य लक्षणम्** - यदि पृच्छकः मार्गे यात्राकाले अथवा शयनकाले वा दोलायां गजे तुरङ्गे वारूढे भावरहितं फलपुष्पदक्षिणादिद्रव्यविवर्जितं प्रश्नं पृच्छति तर्हि तदाऽसंयुक्तप्रश्नः इति कथ्यते। अत्र गजाश्वादिवाहनारूढस्थानेऽपि लोकयान-रेलयान-द्विचक्रिकायानानामारूढे यात्राकाले भावरहितः फलद्रव्यविवर्जितः प्रश्नः असंयुक्तः इत्यर्थः। अस्मिन् प्रश्ने बहुदिनानन्तरं लाभसुखादिकार्यसिद्धिर्जायते। यथोक्तं केरलप्रश्नशास्त्रसंग्रहे -

**यदि पथि शयानो दोला-गज-तुरङ्गारूढो वा भवति।**

**भावरहित: फलद्रव्यविवर्जित: पृच्छति तदाऽसंयुक्तप्रश्न:।**

**अस्मिन् प्रश्ने बहुदिनानन्तरं लाभादि सुखं भवति।।**(केरलप्रश्न.श्लो.16)

वस्तुत: संयुक्तासंयुक्तप्रश्नयो: लक्षणेन प्रश्नकर्ता मन:स्थिति: प्रतिबिम्बिता भवति। कथ्यते यत् - मन एव मनुष्याणां कारणं बन्धमोक्षयो:। इति सिद्धान्तेन सन्तुलितचेतना कर्तव्यसिद्धे: सूचिका तथा असन्तुलिता चेतना कार्यविलम्बस्य असिद्धेश्च सूचिकास्ति।

3) **अभिहतप्रश्नस्य लक्षणम्** - यदि पृच्छक: प्रश्नकाले स्वकीयशरीरस्य वामाङ्गं वामहस्तेन स्पृष्ट्वा प्रश्नं पृच्छति तदेव अभिहतप्रश्न इत्युच्यते। स चाभिहतप्रश्न: कार्यस्य हानीकरो भवति। यथोक्तम् केरलप्रश्नशास्त्रसंग्रहे -

**यदि प्रष्टा वामहस्तेन वामाङ्गं स्पृशति।**

**तदाऽभिहत: प्रश्न: अलाभकरो भवति।।**(केरलप्रश्न.श्लो.17)

4) **अनभिहतप्रश्नस्य लक्षणम्** - यदि पृच्छक: प्रश्नकाले स्वकीयवामहस्तेन अपरजनस्याङ्गं स्पृष्ट्वा प्रश्नं पृच्छति तदेव अनभिहतप्रश्न इत्युच्यते। असौ चानभिहतप्रश्न: कार्यस्य सिद्धिप्रदायको लाभकरो भवति। यथोक्तम् केरलप्रश्नशास्त्रसंग्रहे-

**स्वहस्तेन परायं स्पृशेद्यदि। तदाऽभिहत: प्रश्न: कार्यलाभकर: स्मृत:।।** (केरलप्रश्न.श्लो.18)

5) **अभिघातिकप्रश्नस्य लक्षणम्** - यदा प्रश्नकर्ता स्वमस्तकं हृदयं पादं हस्तं कटिं वा मर्दयित्वा प्रश्नं पृच्छति तदा तदभिघातिकप्रश्न इत्युच्यते। अयं चाभिघातिकप्रश्न: प्रष्टु: शोकसन्तापकारको भवति। यथोक्तम् केरलप्रश्नशास्त्रसंग्रहे -

**मस्तकं हृदयं पादं हस्तं वा मर्दयेत्कटिम्।**

**तदाऽभिघातिक: प्रश्न: प्रष्टु: सन्तापकारक:।।** (केरलप्रश्न.श्लो.19)

6) **आलिङ्गितप्रश्नस्य लक्षणम्** - यदि पृच्छक: प्रश्नकाले स्वकीयशरीरस्य दक्षिणाङ्गं दक्षिणहस्तेन स्पृष्ट्वा प्रश्नं पृच्छति तदा आलिङ्गितप्रश्न इत्युच्यते। स चालिङ्गितप्रश्न: लाभसुखादिकारको भवति। यथोक्तम् केरलप्रश्नशास्त्रसंग्रहे-

**यदि प्रष्टा दक्षिणकरेण निजं दक्षिणाङ्गं स्पृशति।**

**तदाऽऽलिङ्गित: प्रश्न: लाभसुखादिकारको भवति।।**(केरलप्रश्न.श्लो.20)

7) **अभिधूमितप्रश्नस्य लक्षणम्** - यदि प्रश्नकर्ता दक्षिणकरेण वामकरेण वा स्वकीयशरीरस्य नैकाङ्गान् स्पृष्ट्वा प्रश्नं पृच्छति तदेव अभिधूमितप्रश्न इत्युच्यते। असौ अभिधूमितप्रश्न: किञ्चिल्लाभकरो मित्राद्यागमनञ्च भवति। यथोक्तं केरलप्रश्नशास्त्रसंग्रहे -

**यदि प्रष्टा दक्षिणवामकरेण वा । सर्वाङ्गं स्पृशति तदाऽभिधूमित:।**

**अस्मिन् प्रश्ने किञ्चिल्लाभ: मित्राद्यागमनं च।।**(केरलप्रश्न.श्लो.21)

8) **दग्धप्रश्नस्य लक्षणम्** – यदि प्रश्नकर्ता रोदित्वा दु:खेन भयेन च निकृष्टस्थाने (श्मशाने, युद्धभूमौ, कुत्सितस्थाने, गुहायाम्, आकस्मिकदुर्घटणास्थले, बन्धनगृहे चादिस्थाने) भक्तिभावरहितं प्रश्नं पृच्छति चेत्तदा दग्धप्रश्न इत्युदाहृत:। अयं प्रश्न: शोकसंतापदु:खपीडाप्रदायक: हानीकरश्च भवति। यथोक्तम् –

**यदि प्रष्टा रुदन् दु:खभयार्त्त: नीचस्थलसन्निधौ।**

**भक्तिभावरहित: पृच्छति तदा दग्धप्रश्न उदाहृत:।**

**एष प्रश्न: शोकसंताप: दु:खपीडा बह्वलाभकरो भवति।।**(केरलप्रश्न.श्लो.22)

एवं प्रश्नमार्गे प्रश्नशास्त्रस्य फलकथने नैके भेदा: दृश्यन्ते, तेषु स्वरज्ञानेन प्रश्नफलकथनं, शकुनज्ञानेन प्रश्नफलकथनं, पृच्छकचेष्टया प्रश्नफलकथनं, प्रश्नाद्यक्षरेण प्रश्नफलकथनञ्चान्यतमम्।

**प्रश्नकालिकस्वरविचार:-** प्रतिदिनं सूर्योदयात्पूर्वं स्वरस्य परीक्षणमवश्यं करणीयम्। श्वरज्ञानाय श्वाससम्बन्धीन: इडा-पिंगला-सुषुम्नानाडीनां गति: तत्र पृथ्वीजलादितत्त्वानां संचारश्च विज्ञायताम्। तेन स्वरज्ञानेन स्वस्य सकलं शुभाशुभं तथा पृच्छकस्य नष्टादिद्रव्याणां प्राप्तिरपि वक्तव्यम्। तत्रापि वामश्वर: इडा, दक्षिणश्वर: पिंगला, उभयदक्षिणवामश्वर: सुषुम्ना इति नाड्या ख्यात:। यथोक्तं प्रश्नमार्गे –

**कार्यं श्वासपरीक्षणं प्रतिदिनं बुध्वा प्रभातागमे**

**तस्येडादिगतिर्द्धराप्रभृतिसंचारश्च विज्ञायताम्।**

**तेनात्मीयशुभाशुभं हि सकलं ज्ञेयं पुन: पृच्छतां**

**तत्कालात्मसमीकरणेन च तथा नष्टादिकं चोच्यताम्।।** (प्र.मा.द्वि.अ.,श्लो.28)

यदि सोम-बुध-गुरु-शुक्रवासरेषु अन्यतमे वासरे वामश्वर: चलति तथा मङ्गल-शनि-रविवासरेषु अन्यतमे वासरे दक्षिणश्वर: चलति तदा प्रष्टु: शुभप्रदो भवति। परन्तु शुभग्रहाणां वासरे दक्षिणश्वर: पापग्रहाणां वासरे वामश्वर: अशुभफलप्रदायको भवति। शुभग्रहाणां वासरे प्रवाहित: वामश्वर:, पापग्रहाणां वासरे दक्षिणस्वर: शरीरस्वस्थतां, धनलाभं, मधुरभोजनम्, अभीष्टकार्यसिद्धिञ्च करोति। एतद्भिन्नस्वरचलने मधुरभोजनं धनलाभ:, सुखेन शयनञ्च न जायते, तदा सर्वै: साकं कलह:, मलसम्बन्धीकष्टश्च जायते। यथोक्तम् –

**वारेष्विन्दुबुधाङ्गिरो भृगुभुवां वामे चरन् मारुतो**

**भौमार्कार्किदिनेषु दक्षिणगतो नृणामभीष्ट: स्मृत:।**

**सौम्यानां दिवसेषु दक्षिणगतोऽनिष्टो सतां वामगो**

**वक्ष्यन्ते मरुतो: शुभाशुभदयोर्भेदा: फलानामथ।।**

**सर्वेषामपि वासरेषु पवनेऽभीष्टे वपु स्वस्थता**

**लाभोऽर्थस्य च मृष्टभोजनमितीष्टानामभावोऽन्यथा।**

**श्वासश्चेदहितो न मृष्टमशनं नार्थागमो विग्रह:**

**सर्वैर्नो शयनं सुखेन च सुखं विण्मोक्षणादिष्वपि।।** (प्र.मा.द्वि.अ.2, श्लो.29-30)

तत्रापि कथ्यते – यदि श्वासस्य प्रतिकूलता रविवासरे स्यात्तदा वपुर्वेदना, सोमवासरे कलहः, भौमवासरे मृत्युः दूरदेशे यात्रा च, बुधवासरे राज्यशासने क्लेशः, शुक्रवासरे प्रत्येककार्ये असिद्धिः, शनिवासरे स्ववीर्यकृषिनाशो विवादादयश्च जायन्ते। यथोक्तं प्रश्नमार्गे –

**श्वासस्य प्रतिकूलता यदि दिने भानोर्वपुर्वेदना**

**शीतांशोः कलहः कुजस्य मरणं दूरप्रयाणं विदः**

**राज्यापद्धिषणस्य शुक्रदिवसे कार्यस्य कस्यापि नो**

**सिद्धिर्मन्ददिने स्ववीर्यकृषिनाशोविवादादयः ।।**(प्र.मा.द्वि.अ., श्लो.31)

एवं यदि रविवासरात् अष्टदिनं यावत् निरन्तरं वामश्वरः चलति चेत्तदा गुरोः मृत्युः गम्भीरव्याधिश्च जायते। एवं सोमवासरादष्टदिनं यावत् दक्षिणश्वरचलनेन पुत्रापत्तिः, भौमवासरादष्टदिनं यावत् वामश्वरचलनेन शत्रुणां बन्धनम्, गुरुबुधयोः वासरादष्टदिनं यावत् दक्षिणस्वरचलने गुरोः स्वस्य च मृत्युः, शुक्रस्य वासरादष्टदिनं यावत् दक्षिणश्वरः चलति चेत्तदा भूमिविवादेन धननाशः, शनिवासरात् वामस्वरः चलति चेत्तदा स्त्रीनाशश्च जायते। यथोक्तं प्रश्नमार्गे –

**वायुर्भानुदिनाष्टके यदि चरेद्वामे गुरोः पंचता**

**व्याधिर्वा सुमहांस्तथैव हिमगोर्वाराष्टके दक्षिणे**

**पुत्रापत् क्षितिजस्य बन्धनमरेर्वामे विदो दक्षिणे**

**मृत्युः स्वस्य निरन्तरं सुरगुरोर्मृत्युर्गुरोः संभवेत् ।।**

**शुक्रस्यावनिहेतुर्द्धनक्षयो दक्षिणे शनेर्वामे ।**

**यदि चरति मातरिश्वा भार्यानाशो निवासनाशौ वा ।।**(प्र.मा.द्वि.अ. श्लो.32-33)

अथ पञ्चमहाभूतात्मकश्वासस्य संचारप्रमाणेन तस्य तत्फलं चोच्यते – पृथ्वीतत्वस्य षोडशाङ्गुलदैर्घ्यात्मकः, जलतत्वस्य द्वादशाङ्गुलदैर्घ्यात्मकः, अग्नितत्वस्य अष्टाङ्गुलात्मकः, वायुतत्वस्य षडाङ्गुलात्मकः, आकाशतत्वस्य त्र्याङ्गुलात्मकश्च श्वाससंचारो भवति। एवं प्रकारेण घ्राणयोः रन्ध्रात् संचारश्वासस्य गतेः आङ्गुलात्मकदैर्घ्यवशात् आकाशादितत्वानाम् उदयं जानियात् । यथोक्तम् –

**मेदिन्याः खलु षोडशांगुलमपां दैर्घ्यं दिनेशांगुलं**

**वह्नेर्दन्तिमितांगुलं मरुत एतद्व्यूनमग्न्यंगुलम् ।**

**आकाशस्य च वेद्यमेतदुदितं भूम्यादिभूतात्मक-**

**स्वीयश्वासगतिप्रमाणमुभयोरेतत्समं घ्राणयोः ।।** (प्र.मा.द्वि.अ. श्लो.34)

वारपक्षभेदात्स्वरस्य शुभाशुभत्वं ज्ञायते यथा –

**शुभवारे शुक्लपक्षे सिद्धिदा वामनाडिका ।**

**पापवारे कृष्णपक्षे नाड्यन्या सिद्धिदादिकम् ।।**(प्र.मा.द्वि.अ. श्लो.51)

शुभग्रहाणां वासरे शुक्लपक्षे वामस्वरोदये प्रश्नफलं शुभप्रदं भवति । पापवासरे कृष्णपक्षे दक्षिणस्वरोदये प्रश्नफलं शुभप्रदं स्यात्तथा अनन्तरं स्वरेण जयपराजययोः ज्ञानं क्रियते यथा –

**गृहाच्चन्द्रेण निर्यातः प्रविष्टो भानुना रणे ।**

**शून्याङ्गे वैरिणं कृत्वा कातरोपि जयी भवेद् ।।**

**निष्क्रान्तो भानुना गेहात् प्रविष्टः शशिना रणे ।**

**जीवांशे यस्य वा शत्रुः स शूरोपि विनश्यति ।।**

**दस्यवः शत्रवो भूपाः कितवा व्यवहारिणः ।**

**एते शून्यगताः सौम्याः पूर्णस्था भयदाः स्मृताः।।**

**विवादे द्यूतयुद्धे च स्नानभोजनमैथुने ।**

**व्यवहारे भये भङ्गे भानुनाडी प्रशस्यते ।।**(प्र.मा.द्वि.अ. श्लो.52-55)

अर्थात् जयपराजयविचारे चन्द्रस्वरोदये काले गृहात् प्रस्थानं कुर्यात्, सूर्यस्वरोदये काले युद्धभूमौ प्रवेशं कुर्यात्, रिक्तस्वरोदये शत्रुणा सार्द्धं युद्धः क्रियते चेदवश्यं विजयो भवति । परन्तु सूर्यस्वरोदये काले गृहात् प्रस्थानं, चन्द्रस्वरोदये काले युद्धभूमौ प्रवेशे, पूर्णस्वरोदये शत्रुणा सार्द्धं युद्धः क्रियते चेदवश्यं पराजयो भवति ।

**प्रश्नकालिकशकुनविचारः**

**दिङ्नसो प्रीतिकरं प्रश्नषु दर्शनं यदि श्रवणम्।**

**माङ्गल्यद्रव्याणां भवति शुभं विनिर्दिशेत्तत्र।।**

**हयगजवृषहंसादेः पृच्छाकाले यदि रुतं भवति।**

**दर्शनमथवा तेषां शुभदं प्रश्नं विनिर्दिशेत्तत्र।।** (केरलप्रश्न.श्लो.12-13)

दूतस्वरयोः यदि तुल्यदिशा भवेत्तदा मृत्योः चिह्नं न दृश्यते स्मर्यते वा श्रूयते चेत्तदा अवश्यं रोगी जीवति । परन्तु दूतस्वरयोः यदि भिन्नदिशा भवेत्तदा मृत्योः चिह्नं दृश्यते स्मर्यते वा श्रूयते चेत्तदा अवश्यं रोगी मृत्युवरणं करोतीति शकुनविचारः प्रतिपाद्यते रोगविचारे -

**लयलिङ्गश्रवणेक्षास्मरणाभावे तु दूतमारुतयोः ।**

**एकदिशावस्थाने जीवति रोगी विपर्यये म्रियते ।।**(प्र.मा.द्वि.अ. श्लो.46)

पुनरपि स्वरशकुनयोः सम्बन्धं विधाय प्रश्नविचारः क्रियते यथा -

**अग्रे वामेपि च यदुपरि स्थायिना पृच्छयमानं**

**शुक्ले पक्षे तदिह सकलं लभ्यते चन्द्रचारात् ।**

**पृष्ठेधस्तान्नियतमसिते दक्षिणे सूर्यचारा-**

**दात्मावस्थासदृशमखिलं पृच्छकस्यापि वाच्यम् ।।**(प्र.मा.द्वि.अ. श्लो.47)

**पृच्छकचेष्टाविचारः** - यदि प्रश्नकर्ता वक्षस्थलं अथवा माङ्गलिकवस्तुं (श्रीफलं, पुष्पं कुङ्कुमं, जलपूर्णं, पत्रं, पुस्तकमादि) स्पृष्ट्वा प्रश्नं करोति तर्हि शीघ्रलाभो भवति ।परन्तु अमङ्गलवस्तूनां स्पर्शं कृत्वा प्रश्नः क्रियते चेत्तत्फलं विपरीतं भवति । नाभिं, नासिकां, मुखं, केशं, रोमं, नखद्विजान्, गुह्यद्वारं, पृष्ठं, गुप्ताङ्गं आदि च स्पर्शं कृत्वा प्रश्नं करोति चेत् अनिष्टफलप्राप्तिर्भवति । तद्यथा -

**प्रष्टावक्षोदेशे स्पृशेद्यदि क्षिप्रमीप्सितं लभते।**

**मङ्गलवस्तुनि च तथा विपरीतं फलममङ्गलस्पर्शे।।**

**संस्पृशन्नाभिनासास्यकेशरोमनखद्विजान्।**

**गुह्यपृष्ठस्तनग्रीवाजठरानामिकाङ्गुली:।**

**रन्ध्राणामपि नवकं करपदयोस्तलं च सर्वपर्वाणि।**

**प्रष्टा लभतेऽनिष्टं निम्नस्पर्शे तथैव विज्ञेयम्।**

शरीराङ्गेषु ध्वजाद्यष्टायानां फलविचारः क्रियते यथा –

**प्रागादिदिक्षु मूर्द्धादिष्वङ्गेष्वष्टसु च स्थिताः।**

**ध्वजाद्यास्ततिस्तस्थतिस्पर्शफलमप्यथ कथ्यते ।।**

**ध्वजो धूमश्च सिंहश्च सारमेयो वृषः खरः।**

**दन्ती काकः क्रमादेते दिशास्वैन्द्यादिषु स्थिता।।**

| | | |
|---|---|---|
| **काकः (ईशानकोणः) पादौ** | **ध्वजः (पूर्वदिशा) शीर्षस्थानम्** | **धूमः (अग्निकोणः) नासिका** |
| **गजः (उत्तरदिशा) हृदयः** | | **सिंहः (दक्षिणदिशा) मुखम्** |
| **खरः (वायव्यकोणः) हस्तौ** | **वृषः (पश्चिमदिशा) कण्ठः** | **श्वानः (नैऋत्यकोणः) चक्षुः** |

**मूर्ध्नि ध्वजो घ्रणपुटे तु धूमश्चास्ये हरिः श्रोत्रदृशोः श्वसंज्ञः।**

**कण्ठे वृषः पाणियुगे खरश्च गजश्च हृद्यंघ्रियुगेऽथ काकः।।**(प्र.मा.अ.2.श्लो.65-69)

**प्रश्नाद्यक्षरविचारः**

**आद्यैस्स्वरैस्तु काद्यैश्च वर्गैर्भिन्ना लिपिर्द्विधा।**

**स्वरा जीवस्तनुर्वर्गा इति ज्ञेया च मातृका ।।**

**प्रश्नवाक्यं स्वराद्यं चेज्ज्ञेयं जीवगतं शुभम्।**

**दोषश्च देहविषयो हलाद्यं चेदतोन्यथा ।।**

**वर्गेष्वक्षरपञ्चकं पवनदह्नान्द्राम्बुनापुंसकं**

**वाक्यादौ तु नपुंसकाक्षरमतीवानिष्टदं पृच्छताम्।**

**दुष्टौ मारुतपावकौ बलरिपुर्मध्यः प्रशस्तं जलं**

**दीर्घह्रस्वविभागतः स्वरगणाश्चाम्भोमहेन्द्रात्मकाः।।**

**अकचटतपया वर्गा रविकुजसितसौम्यजीवसौराणाम्।**

**चन्द्रस्य च निर्दिष्टं प्रश्ने प्रथमोद्भवं वर्णम्।।**(प्र.मा.अ.2.श्लो.104-106)

**प्रश्नसमयनिरुपणम् -** प्रश्नशास्त्रस्य एकः प्रमुखः विषयः वर्तते यत् प्रश्नसमयस्य निरुपणम्। अर्थात् प्रश्नस्य कृते कः कालः प्रशास्तोऽप्रशास्तः वेति। तदर्थं आदावेव प्रशास्ताऽप्रशास्तकालविवेचनम् प्रश्नमार्गप्रश्नायनादिग्रन्थेषु दृश्यते। यथोक्तं प्रश्नमार्गे –

**गण्डान्तोष्णविषाष्टमीफणिशिरः पापादयावेक्षण-**

**प्रष्टुप्रत्यरतद्विपद्वधमृतिस्थन्दुप्रदोषादिषु ।**

**सूर्यस्तर्क्षनिशीथसङ्क्रमशुनीतिथ्यादिसन्ध्यर्गला**

**त्रानिष्टर्क्षतिथिस्थिरार्धमृतिदग्धाद्येषु पृच्छाऽशुभा।।** (प्र.मा.अ.1-3)

एतस्मात् ज्ञायते यत् एतेषु दिवसेषु (कालेषु) प्रश्नः न प्रष्टव्यः। ते यथा - 1) गण्डान्तम्, 2) उष्णनक्षत्रम्, 3) विषघटी, 4) अष्टमी, 5) फणिशिरः, 6) पापानां दृष्टिः, 7) अशुभतारा, 8) अष्टमचन्द्रः, 9) प्रदोषसमयः, 10) उदयास्तकालः, 11) संक्रान्तिकालः, 12) तिथिसन्धिः, 13) एकार्गलः, 14) स्थिरकरणम्, 15) वालान्नवर्ज्यतारा, 16) मृत्युयोगः, 17) दग्धादितिथयः, 18) इतरवर्ज्यकालः चेति।

**1) गण्डान्तम् -** गण्डान्तम् नाम सन्धिविशेषः। कस्य सन्धिरित्युक्ते तिथि-नक्षत्र-लग्नविशेषाणां यः सन्धिकालः सः गण्डान्तसंज्ञः। अत्र तिथिगण्डान्तं, नक्षत्रगण्डान्तं, लग्नगण्डान्तमिति त्रिविधम्।

**तिथिगण्डान्तम् -** तिथिगण्डान्तम् नाम तिथेः सन्धिकालः। सन्दर्भेऽस्मिन् पूर्णातिथयः (पञ्चमी, दशमी, पञ्चदशी) नन्दातिथयः (प्रतिपत्, षष्ठी, एकादशी) चेति गृह्यन्ते। अत्र पूर्णातिथीनां अन्तिमैकाघटिका, नन्दातिथीनां आद्यैकाघटिका संयोगेन तिथिसन्धिकाले घटिकाद्वयं गण्डान्तं भवति। अर्थात् पूर्णा-नन्दा-तिथयोरन्तराले घटिकाद्वयं गण्डान्तसंज्ञमिति ज्ञेयम्। यथा - पञ्चदशीतिथेः अन्तिमघटिका प्रतिपत्तिथेः आदिमघटिका मिलित्वा घटिकाद्वयं भवति। तथैव अन्येषां वोधव्यम्।

**नक्षत्रगण्डान्तम् -** ज्येष्ठा-रेवती-आश्लेषानक्षत्राणां अन्त्यघटिकाद्वयं गण्डान्तसंज्ञमिति ज्ञेयम्। पुनश्च मूला-अश्विनी-मघानक्षत्राणां आद्यघटिकाद्वयं गण्डान्तसंज्ञकमिति ज्ञेयम्। अर्थात् नक्षत्रद्वयान्तराले स्थिताः चतुर्घटिकाः गण्डान्तसंज्ञकाः।

**ज्येष्ठापौष्णभसार्पभान्त्यघटिकायुग्मं च मूलाश्विनी**

**पित्र्यादौ घटिकाद्वयं निगदितं तद्भस्य गण्डान्तकम्।।**(मु.चि.पी.धा.टी., वि.प्र.)

मुहूर्त्तविवेचने एवं विदितोऽस्ति यत् -

**अश्विमूलमघाद्यंशा पूषाहीन्द्रान्त्यपादकाः।**

**एते नक्षत्रगण्डान्ता विवर्ज्याः सर्वकर्मसु।।** (मु.वि.8-20)

**लग्नगण्डान्तम् - कर्काल्यण्डजभान्ततोऽर्धघटिका सिंहाश्वमेषादिगा ।**(मु.चि.पि.धा.टी, वि.प्र. 43)

अनेन श्लोकांशेन कर्कवृश्चिकमीनानामन्त्यार्धघटिकाः सिंहधनुमेषानाम् आद्यार्धघटीकाश्च गण्डान्तसंज्ञकाः भवन्तीति ज्ञायते। सारावल्यां लग्नगण्डान्तं स्पष्टीक्रियते यथा -

**कुलीरमीनालिगृहान्तसन्धि वदन्ति गण्डान्तमिति प्रसिद्धम्।**

**2) उष्णनक्षत्रम् -** सप्तविंशेषु नक्षत्रेषु प्रत्येकं नक्षत्रस्य काश्चन निर्दिष्टाः घटिकाः उष्णसंज्ञकाः भवन्ति। ताः यथा अश्विनी-रोहिणी-पुनर्वसु-मघानक्षत्राणामादौ सार्धसप्तनाडिकाः भरणी-मृगशिर्ष-पुष्य-पूर्वाफाल्गुनि-चित्रानक्षत्राणां 55पञ्चपञ्चाशन्नाडिकानन्तरं 5पञ्चनाडिकाः, कृत्तिका-आर्द्रा-आश्लेषा-उत्तराफाल्गुनि-स्वातीनक्षत्राणां 21एकविंशत्तिनाडिकानन्तरं 9नवनाडिकाः, विशाखा-मूल-श्रवण-पूर्वभाद्रपदनक्षत्राणामादौ 8अष्टनाडिकाः, अनुराधा-पूर्वाषाढा-धनिष्ठा-उत्तराभाद्रपदनक्षत्राणां 52द्विपञ्चाशन्नाडिकानन्तरं 8अष्टनाडिकाः, ज्येष्ठा-उत्तराषाढा-शतभिषा-रेवतीनक्षत्राणां 20

विंशतिनाडिकानन्तरं 10दशनाडिकाः उष्णनक्षत्रनाडिका इत्युच्यन्ते। यथोक्तं –अश्वां यामोद्वितीयः शरमितघटीका याम्यभेऽन्त्ये नव स्युः

**नाड्यो द्वाविंशदाद्याः शिखिनि पवनभान्तं तथा त्रित्रिरेवम्।**

**शूर्पास्याद्योऽष्टनाड्यो वसुमितघटीका मैत्रभेन्त्यो दश स्युः**

**नाड्योऽधः शक्रभार्धात् पुनरपि निऋतेस्त्रिस्त्रिरेवं तथोष्णम्।।**(मु.वि.10य23)

**3) विषघटी** - विषघटी इत्युक्ते कश्चन निर्दिष्टा अशुभसमयः। तत्तु नक्षत्राणां, तिथीनां, वासराणां वा कश्चन विषवत्कालः भवितुमर्हति। यथा पयपरिपूर्णे घटे विन्दुमात्रं विषं पतति चेत्तत् पूर्णपयभाण्डं विषमयं भवति, तथैव विषघटीसमयेऽस्मिन् प्रारम्भितस्य यस्य कस्यापि कार्यस्य अथवा पृच्छकस्य प्रश्नस्य हानिरेव जायते इत्याशयः। तथा चोक्तम् –

**विवाहव्रतचूडासु गृहारम्भप्रवेशयोः।**

**यात्रादिशुभकार्येषु विघ्नदा विषनाडिका।।** (मु.चि.पि.धा.टी.वि.प्र)

**नक्षत्रविषघटी** - अश्विन्यादिसप्तविंशतिनक्षत्रेषु क्रमशः 50, 24, 30, 40, 24, 21, 30, 20, 32, 30, 20, 18, 21, 20, 14, 14, 10, 14, 56, 24, 20, 10, 10, 18, 16, 24, 30 एताभ्यः घटीकाभ्यः अग्रे चतस्रोघटिकाः मध्यममानेन विषघटिकाः भवन्ति।

**तिथिविषघटी** - प्रतिपदादितिथिषु क्रमशः 15, 5, 8, 7, 7, 5, 4, 8, 7, 10, 3, 10, 12, 7, 8 एताभ्यः घटिकाभ्यः अग्रे चतस्रो घटिकाः मध्यममानेन विषघटिकाः भवन्ति।

**वासरविषघटी** - सूर्यादिवासरेषु क्रमशः 20, 2, 12, 10, 7, 5, 25 नाडीकाभ्यः परं चतस्रनाड्यो विषं भवति।

**4) अष्टमी** - शुक्लपक्षस्य अष्टमीतिथौ प्रश्नः नप्रष्टव्यः।

**5) फणिशिरः** - व्यतीपातयोगस्य उत्तरार्धं फणिशिरो नाम्नाऽभीधियते। तत्कालसूर्येन्दुसंयोगः यदा अनुराधानक्षत्रस्य उत्तरार्धे भवति तदा फणिशिरदोषः जायते। मुहूर्त्तग्रन्थानुसारमुक्तम् – चन्द्रार्गयोगे मैत्रान्त्यदलं स्यात्सार्पमस्तकम्।

**6) पापानां दृष्टिः** - पृछकस्य प्रश्नकालिकलग्नस्योपरि यदि पापग्रहाणां दृष्टिस्स्यात्तदा प्रश्नस्य हानिरेव जायते।

**7) अशुभतारा** - स्वजन्मनक्षत्रात् तात्कालिकनक्षत्रं यावत् गणयेत् । प्राप्तसंख्या नवभिः भागे सति आगतशेषाङ्कानुसारं जन्मादिनवतारकानां ज्ञानं भवति। जन्म-सम्पत्-विपत्-क्षेम-प्रत्यरि-साधक-बध-मित्र-अतिमित्राख्याः नवतारकाः सन्ति। एताषु विपत्-प्रत्यरि-बधतारकाः अशुभाः स्युः। अतः एताः ताराः प्रश्नार्थे निषिद्धाः भवन्ति।

**8) अष्टमचन्द्रः** - पृछकस्य प्रश्नकर्तुं इप्सितकाले यदि तात्कालिकलग्नकुण्डल्यां अष्टमभावे चन्द्रः स्यात्तदा प्रश्नः न प्रष्टव्यः।

**9) प्रदोषसमयः** - सूर्यास्तमनकालात्परं यामार्द्धकालः त्रयोदशी वर्तते चेत् सा रात्री सर्वकार्यस्य विघ्नं करोति। यथोक्तम्

**रात्रौ यामद्वयादर्वाक् दृश्यते चेत् त्रयोदशी।**

**सा रात्री सर्वकार्यघ्नी शङ्कराराधनं विना।।**(मु.वि.27.55)

**10) उदयास्तकालः** - प्रत्यह सूर्यस्य उदयास्तकाले सन्धिसमये प्रश्नः न प्रष्टव्यः।

**11) संक्रान्तिकालः** - संक्रान्त्यात् संक्रान्तिं यावत् सौरमासः भवति। एकस्मिन् सौरवर्षे द्वादशसौरमासाः भवन्ति। प्रति सौरमासस्य प्रारम्भे सूर्यः एकराशिं परित्यक्त्वा अपरराशिं प्रति संक्रमणं करोति। तस्मिन् संक्रमणकाले प्रश्नः न प्रष्टव्यः।

**12) तिथिसन्धिः** - प्रत्येकं तिथेः आद्या तथा अन्तिमा घटी तिथिसन्धि इत्युच्यते। अस्यां तिथिसन्धौ पृछकेन पृष्टप्रश्नः हानिप्रदः भवति।

**13) एकार्गलः** - एकार्गलदोषोऽयं प्रश्नार्थेऽप्रशस्तः। एकार्गलदोषज्ञानाय काश्चित्प्रक्रिया वर्त्तते। तदर्थं कैश्चित् विष्कुम्भादियोगैः साकं कानिचित् नक्षत्राणि द्रष्टव्यानि। अर्थात् निर्दिष्टयोगेषु निर्दिष्टनक्षत्रस्य अवस्थानं स्यात्। तत्रापि सूर्यः यदि चन्द्रस्थितनक्षत्रात् विषमनक्षत्रे स्यात्, अथवा चन्द्रः सूर्यस्थितनक्षत्रात् विषमनक्षत्रे स्यात्तदा एकार्गलयोगो भवति। तदाह –

**व्यतिपातो यदाश्लेषा व्याघाते तु पुनर्वसु।**

**अतिगण्डेऽनुराधा च मूर्ध्निभं परिघे मघा।।**

**विष्कुम्भे चाश्विनी पुष्यो वज्रो चित्रा तु वैधृतौ।**

**यथा शूले मृगे गण्डे मूलभं मूर्ध्नि विन्यसेत्।।**(मु.ग.वि.प्र155-156)

स्पष्टार्थचक्रम् –

| योगाः | वैधृतिः | अतिगण्डः | परिघः | व्यतीपातः | विष्कुम्भः | व्याघातः | गण्डः | शूलः | वज्राः |
|---|---|---|---|---|---|---|---|---|---|
| नक्षत्राणि | चित्रा | अनुराधा | मघा | आश्लेषा | अश्विनी | पुनर्वसु | मूलः | मृगशी. | पुष्यः |

उदाहरणम् – यस्मिन् दिवसे वैधृतियोगं चित्रानक्षत्रञ्च स्यात्तदा सः दिवसः एकार्गलदोषयुक्तः भवति। एवमपरेषां ज्ञातव्यम्। प्रकारान्तरस्य उदाहरणं यथा – यस्मिन् दिवसे पुष्यनक्षत्रे सूर्यः एवं मघानक्षत्रे चन्द्रः स्यात्तदा तौ परस्परं स्वस्थानात् विषमार्क्षगतत्वात् एकार्गलदोषो भवति।

**14) स्थिरकरणम्** - कृष्णचतुर्दश्याः उत्तरार्धात् शुक्लप्रतिपत्तिथेः पूर्वार्धान्तं यावत् क्रमेण शकुनि-चतुष्पात-नाग-किंस्तुघ्नकरणानि इति चत्वारि स्थिरकरणानि सन्ति। एतेषां करणानां प्रचलने प्रश्नः न प्रष्टव्यः।

**15) वालान्नवर्ज्यतारा** - या तारकाः वालकस्य अन्नप्राशनमुहूर्त्ते वर्जिताः सन्ति, ता एव वालान्नवर्ज्यतारकाः इत्युच्यन्ते। यथा – **ज्येष्ठार्द्रायमकृत्तिकोऽरगमघापूर्वाविशाखासुराः।**(मु.प.36.13)

अर्थात् ज्येष्ठा, आर्द्रा, भरणी, कृत्तिका, आश्लेषा, पूर्वात्रयं, विशाखा, मूला एतानि नक्षत्राणि अन्नप्राशनमुहूर्त्तार्थं अशुभानि, अन्यानि शुभानि इत्यर्थः।

**16) मृत्युयोगः** - आनन्दादियोगेषु मृत्युयोगस्य अशुभाधिक्यात्पृछकस्य प्रश्नविचारसमये योगोऽयं त्याज्यः। अर्थात् योगेऽस्मिन् प्रश्नो न प्रष्टव्यः। तत्र नन्दायोगः कदा जायते? प्रश्नस्यास्य समाधानाय नन्दादितिथिभिः साकं कानिचननक्षत्रणां रव्यादिवासराणां च युतिसम्बन्धः द्रष्टव्यः। तद्यथा –

वासराः रविः सोमः भौमः बुधः गुरुः शुक्रः शनिः

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| तिथयः | नन्दा | भद्रा | नन्दा | जया | रिक्ता | भद्रा | पूर्णा |
| नक्षत्राणि | मघा | विशा. | आर्द्रा | मूलः | शतभि. | रोहिणी | उत्तराषाढा |

अर्थात् उपरिचक्रे लिखितक्रमेण तिथयः नक्षत्राणि च रव्यादिवासरैः युक्ताश्चेत् मृत्युयोगः जायते। तदाह –

**मृत्युयोगा मघाशूर्पा रौद्रमूलप्रचेतसः।**

**रोहिणी चोत्तराषाढा युक्ता सूर्यादिवासरैः॥** (मु.वि.26-53)

**17) दग्धादितिथयः -**

**सूर्यशशरनेत्राङ्गनागाङ्कतिथयः क्रमात्।**

**अर्कादिवारैः सहिताः दग्धयोगाः प्रकीर्तिताः॥**(मु.वि. 27-54)

अर्थात् कृष्णद्वादश्येकादशीपञ्चमीद्वितीयाषष्ठ्यष्टमीनवम्यः सप्ततिथयः सूर्यादिवासरैः युक्ताश्चेत् दग्धयोगः जायते। स्पष्टार्थं चक्रम् –

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| वासराः | रविः | सोमः | भौमः | बुधः | गुरुः | शुक्रः | शनिः |
| तिथयः | 12 | 11 | 05 | 02 | 06 | 08 | 09 कृष्णपक्षे |

**18) इतरवर्ज्यकालः -** उपरि लिखितकालान् विहाय भूकम्पोल्लापातधूमकेतूदयसमयप्रभृतिषु प्राकृतिकदैवोत्पादकेषु प्रश्नः नप्रष्टव्य इति।

प्रश्नार्थवर्जितकालविचारः कथितः प्रश्नमार्गे यथा –

**बालान्नवर्ज्यतारासु गण्डोन्तोष्णविशेषु च।**

**अष्टमीविष्टिरिक्तासु स्थिरेषु करणेषु च ।**

**तिथिनक्षत्रराश्यंशसन्धौ च गुलिकोदये ।**

**चक्राद्र्धे ग्रहणे सार्पशिरस्येकार्गले तथा ॥**

**मृत्युदग्धादियोगेषु पापदृष्ट्युदयेषु च ।**

**त्रयोदश्यां प्रदोषे च निशीथे रविदर्शने॥**

**संक्रान्तौ च तथा प्रष्टुर्विप्रत्प्रत्यरयोर्वधे।**

**अष्टमे च तथा राशौ जन्माष्टमगते विधौ॥**

**इत्यादि दुष्टकालेषु प्रश्नस्यादशुभप्रदः॥**(प्र.मा.द्वि.अ.2, श्लो.16-20)

ज्योतिषशास्त्रस्यैकः प्रमुखांशो वर्त्तते कालनिरूपणम्। कालस्य प्राधान्यात् तत् कालविधायकं शास्त्रमिति उच्यते। तदनुरोधेन कार्यस्यारम्भः शुभसमये क्रियते चेत् तस्य सिद्धिः जायते। अन्यथा हानिरेव। तदर्थं प्राचीनकाले राज्ञां शासनकालेऽपि शुभसमयं ज्ञातुं तेषां राजसभायां दैवज्ञा आसन्। राजानः तेषां मार्गदर्शनेन कार्याणि कुर्वन्ति स्म। अतः वराहमिहिराचार्येण दैवज्ञरहितस्य राज्ञः स्थितिः कथ्यते। तदाह –

**अप्रदीपा यथा रात्रिरनादित्यं यथा नभः।**

**तथाऽसांवत्सरो राजा भ्रमत्यन्ध इवाध्वनि।।**( बृ.स.द्वि.अ., श्लो.24 )

वस्तुतस्तु दैवज्ञस्य कर्तव्यं भवति यत् – पृछकेन कृतप्रश्नस्य शुभाशुभफलादेशं दद्यात्। परन्तु प्रश्नप्रष्टुं शुभकालस्य ज्ञानं पृछकस्य पार्श्वे अवश्यं स्यात्। अर्थात् अशुभकाले कृतप्रश्न अशुभफलदायको भवति। अतः प्रश्नः कदा करणीय इति शंकायां प्रश्नमार्गग्रन्थे उच्यते –

**इत्यादिदोषरहिते कालेऽमृतघटीषु च ।**

**शुभानामुदये दृष्टौ मुहूर्त्तेषु शुभेषु च ।**

**सिद्धामृतादियोगेषु पृछाभीष्टफलप्रदा।।** ( प्र.मा.2, श्लो.21 )

अर्थात् उपर्युक्तगण्डान्तादि निषिद्धकालान् विहाय अमृतवेलायां, लग्नोपरि शुभग्रहाणां दृष्टौ, शुभमुहूर्त्ते, सिद्धियोगे च प्रश्नः प्रष्टव्यः।

**प्रश्नोचितानुचितस्थानविचारः-** प्रश्नकर्तुं योग्यस्थानस्य कथनक्रमे प्रश्नमार्गे कथ्यते यथा –

**फलप्रसूनसम्पूर्णमहीरुहसमाकुले ।**

**स्निग्धभूमितले रत्नकांचनादिसमन्विते।।**

**पञ्चेन्द्रियमनः प्रीतिकरे गोमयवारिणा।**

**तत्क्षणप्रोक्षितक्षोणितले समवसुन्धरे।।**

**मङ्गल्यकर्मसंयुक्ते मङ्गलस्त्रीसमाकुले।**

**मन्दिरे पुत्रभार्यादिहृष्टपुष्टजनाश्रिते।।**

**यः पृच्छतीदृशे देशे साप्नोत्यभिमतं ध्रुवम्।।**( प्र.मा.द्वि.अ.2, श्लो.22-25 )

अर्थात् फलपुष्पवृक्षैः सम्पन्ने स्निग्धभूमितले, रत्नसुवर्णादिसमन्विते स्थाने, पञ्चेन्द्रियमनः प्रीतिकरे स्थाने, गोमयवारिणा प्रोक्षितायां सुसाधितायामवनौ, मङ्गल्यकर्मसंयुक्ते मङ्गलस्त्रीयुक्ते स्थाने, इष्टसिद्धमन्दिरप्राङ्गणे, पुत्रभार्यादिहृष्टपुष्टजनाश्रितस्थाने च यः पृच्छकः प्रश्नं पृच्छति तस्याभीष्टफलं सुनिश्चितं फलति। प्रश्नकर्तुमनुचितस्थानविचारे कथ्यते यथा –

**महावने श्मशानान्ते निम्नोच्चे शून्यमन्दिरे ।**

**गृहे चार्तजने प्रेतक्रियाद्यशुभकर्मणि ।।**

**जलाग्निशुष्कवृक्षान्ते तथैवेन्द्रियचेतसाम्।**

**अनिष्टदे प्रदेशे च प्रष्टा नाप्नोत्यभीप्सितम्।।**(प्र.मा.द्वि.अ.2, श्लो.22-25)

अर्थात् वृक्षलतादिभिरावृते घोरान्धकारवने, श्मसाननिकटे, निम्नोच्चस्थाने, जनशून्यमन्दिरे, दुःखकष्टेन पीडितस्य जीर्णगृहे, प्रेतक्रियाद्यशुभकर्मणि स्थाने, जल-अग्नि-शुष्कवृक्षसमीपे, पञ्चेन्द्रियमनः अप्रीतिकरस्थाने, अनिष्टदे प्रदेशे च प्रश्नः न करणीयः। यदि कश्चित् प्रश्नं करोति तर्हि तस्याभीप्सितं नश्यति।

**सन्दर्भग्रन्थाः**

1. षट्पञ्चाशिका, दैवज्ञपृथुयशो, चौखम्भा संस्कृत संस्थान, वाराणसी, संस्करणम्-2009
2. प्रश्नवैष्णशास्त्रम्, श्रीसिद्धनारायणदासः, खेमराज श्राकृष्णदास श्रीवेंकटेश्वर बम्वई प्रकाशन-1987
3. प्रश्नभूषणम्, दैवज्ञश्रीजीवनाथः,चौखम्भा संस्कृत संस्थान,वाराणसा, संस्करणन्-1999
4. प्रश्नशिरोमणि, पण्डितरुद्रमणिविरचितः,खेमराज श्राकृष्णदास श्रीवेंकटेश्वर बम्वई, संस्करणम्-2005
5. षट्पञ्चाशिका, दैवज्ञपृथुयशो , बी.के.पब्लिकेशन प्रा.लिमिटेड,भुवनेश्वर, संस्करणम्-2012
6. गणतरङ्गिणि, सुधाकरद्विवेदी,शिव संस्कृत संस्थान, वाराणासी, संस्करणम्-2002
7. भुवनदीपकः, सत्येन्द्र मिश्रः,चौखम्बासंस्कृतप्रतिष्ठानम्, वारणासी, संस्करणम्-2002
8. बृहज्जातकम्, वराहमिहिराचार्यः, चौखम्बासंस्कृतप्रतिष्ठानम्, वारणासी, संस्करणम् - 2009
9. फलदीपिका, मन्त्रेश्वराचार्यः, रञ्जनपब्लिकेशन्स, नईदिल्ली, संस्करणम् - 2009
10. जातकाभरणम्, श्रीढुण्ढिराजः, चौखम्बासंस्कृतभवनम्, वारणासी, संस्करणम् - वि.स. 2069